शूलोत्खा, स्त्री, सोमराजी । इति शब्दचन्द्रिका॥

शूल्यं,त्रि (शूलेन संस्कृतम् । शूल + "शूलोखाद् यत् ।" ४ । २ । १७ । इति यत्) शूलाकृतम् । इत्यमरः ॥ कावाव् इति पारस्यभाषा । तत्पाकप्रकारो यथा,—

"कालखण्डादिमांसानि ग्रथितानि शलाकया। घृतं सलवणं दत्त्वा निर्धूमे दहने पचेत् । तत्त शूल्यमिति प्रोक्तं पाककर्म्मविचक्षणैः ॥"

अस्य गुणाः ।

"शूल्यं बल्यं सुधातुल्यं रुच्यं वह्निकरं लघु । कफवातहरं हृद्यं किञ्चित् पित्तहरं हि तत् ॥"

इति भावप्रकाशः ॥

अस्य पर्य्यायः शूलाकृतशब्दे द्रष्टव्यः ॥

शूल्यपाकः,पुं, (शूल्येन पाको यस्य ।)शूलविद्धाङ्गारपक्वमांसादि । इति पाकराजेश्वरः॥कावाव इति पारस्यभाषा ॥

शृध, प्रसवे । इति कविकल्पद्रुमः ॥(भ्वा०-पर०-सक०-सेट् । ) शर्धति । इति दुर्गादासः ॥

शृकालः, पुं, शृगालः । इति शब्दचन्द्रिका ॥

शृगालः,पुं,(सृजति मायामिति । सृज + कालन् पृषोदरादित्वात् साधुः ।) पशुविशेषः । शेयाल् इति भाषा । तत्पर्य्यायः । शिवा २ भूरिमायः ३ गोमायुः ४ मृगधूर्त्तकः ५ वञ्चकः ६ क्रोष्टुः ७ फेरुः ८ फेरवः ९ जम्बुकः १० । इत्यमरः ॥ खगालः ११ जम्बूकः १२ मृतमत्तः १३ कुरवः १४ घोरवासनः १५ वनखा १६ फेरः १७ मृगधूर्त्तः १८ । इति शब्दरत्नावली ॥ शालावृकः १९ गोमी २० कटखादकः २१ । इति जटाधरः ॥ शिवालुः २२ फेरण्डः २३ व्याघ्रनायकः २४ । इति राजनिर्घण्टः ॥ दैत्यभेदः । इति मेदिनी ॥ वासुदेवः । निष्ठुरः । खलः । इति सारस्वताभिधानम् ॥ भीरुः । इत्यनेकार्थकोषः ॥*॥ शृगालशब्दादीनां शुभाशुभसूचकत्वं यथा,—

"अनर्थहेतुर्गतिशब्दहीनः
सदा शृगालः खलु दुष्टभावः ।
शस्ता हि वामा गतिरस्य शस्तो
वामो निनादो निशि यो बहूनाम् ॥
हुवा हुवेति प्रथमं ततस्तु
टटेति दीर्घः सुतरां रवो यः ।
स्यात्जम्बुकानां स नतः प्रशस्त-
स्तदन्यरूपः कथितः प्रदीप्तः ॥
शृगालशब्दो भवने निशाया-
मुखाटनार्थं दिशि पश्चिमायाम् ।
प्राच्यां भयायोत्तरतः शिवाय
भवत्यवाच्यां भयनाशनाय ॥"

इति वसन्तराजशाकुनम् ॥

शृगालकण्टकः, पुं, ( शृगालरोधकः कण्टको यस्य । ) क्षुपविशेषः । इति शब्दचन्द्रिका ॥ शेयालकाटा इति भाषा ॥

शृगालकोलिः, पुं, (शृगालप्रियः कोलिर्यस्य ।) क्षुद्रकोलिवृक्षः । शेयाकुल इति भाषा । तत्पर्य्यायः । कर्कन्धुः २ । इति रत्नमाला॥ अपिच॥

"अथ घोण्टा ३ गोपघोण्टा ४ वदरं ५ वादिरञ्च ६ तत् ।
वदरीसदृशे सूक्ष्मफले वृक्षे चतुष्टयम् ॥"

इति शब्दरत्नावली ॥

शृगालघण्टी, स्त्री, कोकिलाक्षः । इति राजनिर्घण्टः ॥

शृगालजम्बुः, स्त्री, ( शृगालस्य जम्बुरिव । ) गोडुम्बः । घोण्टाफलम् । इति मेदिनी ॥

शृगालविन्ना, स्त्री, (शृगालैर्विन्ना ।)पृश्निपर्णी । इति राजनिर्घण्टः ॥

शृगालिका, स्त्री, शृगालपत्नी । त्रासात् पलायनम् । इति मेदिनी ॥ भूमिकुष्माण्डः इति । जटाधरः ॥ क्षुद्रशृगालः । खेँकशेयाली । इति भाषा । तत्पर्य्यायः । लोमालिका २ दीर्घजिह्वा ३ किखिः ४ उल्कामुखी ५ । इति त्रिकाण्डशेषः ॥

शृगाली, स्त्री, विद्रवः । पलायनमिति यावत् । इति त्रिकाण्डशेषः । कोकिलाक्षः । विदारी । इति राजनिर्घण्टः ॥ शृगालिका च ॥

शृङ्खलः, त्रि, पुंसां कट्याभरणम् । गोट इति भाषा॥ हस्त्यादीनां लौहमयपादबन्धोपकरणम् भाँदु इति दँडुका इति च भाषा । तत्पर्य्यायः। अन्दुकः २ निगडः ३ । इत्यमरः ॥ शृङ्खला ४। इति तट्टीकायां भरतः ॥(यथा, रघुः ।५।७२ ।

"शय्यां जहात्युभयपक्षविनीतनिद्राः
स्तम्बेरमा मुखरशृङ्खलकर्षिणस्ते ॥")

लौहरज्जुः । शिकल वेड़ि इत्यादि भाषा ॥ बन्धनम् । इति हेमचन्द्रः ॥

शृङ्खलकः, पुं, (शृङ्खलं बन्धनमस्य । "शृङ्खलमस्य बन्धनं करभे ।" ५ । २ । ७९ । इति कन् ।) उष्ट्रः । इति राजनिर्घण्टः ॥ ( यथा, माघे । १२ । ७ ।

तीव्रोत्थितास्तावदसह्यरंहसो
विशृङ्खलं शृङ्खलकाः प्रतस्थिरे ॥")

पलायननिषेधाय पादेषु दारुमयपाशलक्षितकरभः । इत्यमरभरतौ ॥( स्वार्थे कन् । ) शृङ्खलञ्च ॥

शृङ्खला,स्त्री, निगडः । पुंस्कटीवस्त्रबन्धः । इति मेदिनी ॥ अन्यत् शृङ्खलशब्दे द्रष्टव्यम् ॥

शृङ्खलितः, त्रि, (शृङ्खला जातोऽस्येति । इतच् ।) शृङ्खलायुक्तः । निगडितः । इति धनञ्जयः ॥

शृङ्खली, स्त्री, कोकिलाक्षः । इति राजनिर्घण्टः॥

शृङ्गं, क्ली, (शॄ हिंसे + "शृणातेर्ह्रस्वश्च ।" उणा० १ । १२५ । इति गन् । धातोर्ह्रस्वत्वं किच्च नुट् च प्रत्ययस्य । ) पर्व्वतोपरिभागः । तत्पर्य्यायः । कूटम् २ कूटः ३ शिखरम् ४ । इत्यमरः ॥ दन्तः ५ प्राग्भारः ६ । इति जटाधरः ॥ शैलाग्रम् ७ । इति त्रिकाण्डशेषः ॥ ( यथा, रघुः । १३ । २६ ।

एतद्गिरेर्माल्यवतः पुरस्ता-
दाविर्भवत्यम्बरलेखि शृङ्गम् ॥")

सानुः । इति नानार्थे अमरः ॥ प्रभुत्वम् । चिह्नम् । क्रीडाजलयन्त्रम् । (यथा रघुः १६ ।७०।

"वर्णोदकैः काञ्चनशृङ्गमुक्तै-
स्तमायताक्ष्यः प्रणयादसिञ्चन् ॥")

विषाणम् । (यथा, रघुः । १६ । १२ ।

"वन्यैरिदानीं महिषैस्तदम्भः
शृङ्गाहतं क्रोशति दीर्घिकाणाम् ॥")

उत्कर्षः । इति मेदिनी ॥ (यथा, रघुः ।८।६२ ।

"शृङ्गं स दृप्तविनयाधिकृतः परेषा-
मत्युच्छ्रितं न ममृषे न तु दीर्घमायुः ॥"

ऊर्द्ध्वम् । (यथा, कुमारे । ७ । ४० ।

"विमानशृङ्गाण्यवगाहमानः
शशंस सेवावसरं सुरेभ्यः ॥" )

तीक्ष्णम् । पङ्कजम् । इति शब्दरत्नावली ॥ ( कोटिः । यथा, कुमारे । २ । ६४ ।

"अथ सललितयोषिद्भ्रूलताचारुशृङ्गं
रतिवलयपदाङ्के चापमासज्य कण्ठे ॥"

स्तनम् । यथा, भागवते । ५ । २ । ११ ।

"किं सम्भृतं रुचिरयोर्द्विज शृङ्गयोस्ते
मध्ये कृशो वहसि यत्र दृशिः श्रिता मे ॥"

"स्तनावालक्ष्याह । शृङ्गयोः स्तनयोः किं सम्भृतं किं पूर्णमस्ति मनोहरं किञ्चिदस्ति यन्न तावत् जानामि ।"इति तट्टीकायां स्वामी ॥*॥) महिषादिशृङ्गनिर्म्मितवाद्यविशेषः । शिङ्गा इति भाषा । यथा,—

"क्वचिद्वनाशाय मनो दधद्व्रजात्
प्रातः समुत्थाय वयस्यवत्सपान् ।
प्रबोधयन् शृङ्गरवेण चारुणा
विनिर्गतो वत्सपुरःसरो हरिः ॥"

इति श्रीभागवते १० स्कन्धे १२ अध्यायः ॥

कामोद्रेकः । यथा, साहित्यदर्पणे । ३ ।२१०।

"शृङ्गं हि मन्मथोद्भेदस्तदागमनहेतुकः ।
उत्तमप्रकृतिप्रायो रसः शृङ्गार इष्यते ॥"*॥

गोशृङ्गभङ्गप्रायश्चित्तं यथा । भवदेवभट्टधृतं यमवचनम् ।

"अस्थिभङ्गं गवां कृत्वा लाङ्गलच्छेदनं तथा ।
पाटने कर्णशृङ्गाणां मासार्द्धन्तु यवान् पिबेत् ॥"

अङ्गिराः ।

"शृङ्गभङ्गेऽस्थिभङ्गे च चर्म्मनिर्म्मोचनेऽपि वा ।
दशरात्रं चरेदेवं सुस्था सा यदि गौर्भवेत् ॥"

भवदेवभट्टहरिनाथोपाध्यायधृतं संवर्त्तवचनम्।

"शृङ्गभङ्गेऽस्थिभङ्गे च कटिभङ्गे तथैव च ।
यदि जीवति षण्मासान् प्रायश्चित्तं न विद्यते॥"

अत्र षण्मासोत्तरमरणे तद्दोषशमनाय प्रायश्चित्तं नास्ति तदभ्यन्तरमरणे वधप्रायश्चित्तं भवति । एवञ्च शृङ्गभङ्गादिनिमित्तकमपि पृथक् प्रायश्चित्तं न कर्त्तव्यम् । वधप्रायश्चित्तेनैव गुरुणा प्रसङ्गात्तदपगमसिद्धेः । षण्मासोत्तरन्तु शृङ्गभङ्गादिनिमित्तकपूर्व्वोक्तमासार्द्धयावकपानं प्राजापत्यं वा कर्त्तव्यम् । इति प्रायश्चित्ततत्त्वम्॥

शृङ्गः, पुं, (शॄ + गन् । उणा० १ । १२५ ।) कूर्च्चशीर्षकवृक्षः । इति मेदिनी ॥ मुनिभेदः । इति शब्दरत्नावली ॥